# Naradaproktam Shivaprasangashrutimahimavarnanam

# નારદપ્રોક્તં શિવપ્રસઙ્ગશ્રુતિમહિમાવર્ણનમ્

## Document Information

Text title : Naradaproktam Shivaprasangashrutimahima

File name : shivaprasangashrutimahimA.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shivarahasyam | harAkhyaH tRitIyAMshaH | uttarArdham | adhyAyaH 10 | 10-30 ||

Latest update : January 30, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 1, 2024

*sanskritdocuments.org*

# નારદપ્રોક્તં શિવપ્રસઙ્ગશ્રુતિમહિમાવર્ણનમ્

શિવપ્રસઙ્ગઃ શિવદાયકો મે યતઃ શિવાવલ્લભસન્નિધાનમ્ ।
તસ્મિન્ પ્રસઙ્ગે સતિ સર્વથાપિ નાન્યત્ર તિષ્ઠત્યગજાપતિસ્તુ ॥ ૧૦॥

શિવપ્રસઙ્ગઃ ક્વ ભવિષ્યતીતિ વિચાર્ય તિષ્ઠત્યપિ ચન્દ્રમૌલિઃ ।
અતઃ પરં મઙ્ગલહેતુરીશો મહેશ્વરઃ સન્નિહિતઃ સ્વભાવાત્ ॥ ૧૧॥

મહેશ્વરાભ્યાગમને ભવાની કુમારમાદાય ગણેશમાદૌ ।
આયાસ્યતીતિ દ્રુતમેવ નન્દી ભૃઙ્ગી ચ સર્વૈઃ સ્વગણૈઃ સમેતઃ ॥ ૧૨॥

અયં પ્રસઙ્ગઃ શ્રુત એવ નૂનં કૈલાસસિંહાસનસંસ્થિતેન ।
શિવેન ગૌર્યાઽપિ ગણેશ્વરેણ સ્કન્દેન નન્દીશમુખૈઃ સુરૈશ્ચ ॥ ૧૩॥

તીર્થાનિ સર્વાણ્યપિ મૂર્તિમન્તિ શિવેન સાકં ગિરિશપ્રસઙ્ગે ।
આગત્ય ધન્યત્વમુપેત્ય તાવત્ યાસ્યન્તિ નૂનં નૃપસત્તમાદ્યાઃ ॥ ૧૪॥

શિવપ્રસઙ્ગઃ સ્વયમેવ પૂજા મહેશ્વરસ્યેતિ મતિર્મમાઽપિ ।
શિવપ્રસઙ્ગેન સમાનપૂજા યતઃ શિવોત્કર્ષક એવ સોઽયમ્ ॥ ૧૫॥

યતઃ શિવોત્કર્ષવિશેષવાર્તા શિવસ્ય પૂજા પરમુક્તિહેતુઃ ।
તદ્વાર્તયા સા ન સુધા સમાના સા મુક્તિદા નેતિ વિનિશ્ચયેન ॥ ૧૬॥

શિવપ્રસઙ્ગઃ સ્વયમેવ મુક્તિં કરોતિ સદ્યઃ શ્રુત એવ સાક્ષાત્ ।
યતો વિરૂપાક્ષહિતપ્રસઙ્ગઃ સંસારસઙ્ગાઙ્કુરપાવકોઽયમ્ ॥ ૧૭॥

શિવપ્રસઙ્ગાય મનોઽસ્મદીયં ન ચોરહાર્યં ન તદન્યહાર્યમ્ ।
શ્રુતોઽપિ ભૂયો ભવતિ પ્રવૃદ્ધઃ હૃતોઽપિ સંસારહરઃ સ્વભાવાત્ ॥ ૧૮॥

શિવપ્રસઙ્ગે ચ વિમુક્તિલાભઃ કથાસુધારાશિકૃતોપકારઃ ।
ન કોઽપિ તાવત્ સ પરં મહેશઃ ગૌરીસમાકર્ષણહેતુભૂતઃ ॥ ૧૯॥

શિવપ્રસઙ્ગયુક્તાનામસ્માકં ગિરિજાપતિઃ ।
પ્રસન્નોઽપિ વિશેષેણ કિમસ્મભ્યં પ્રદાસ્યતિ ॥ ૨૦॥

મહામુક્તિર્મહામ્ભોજચરણામ્બુજરેણુભિઃ ।
સહવાસઃ સ તાવત્ સ્યાત્ તત્કથાશ્રવણાન્નૃપ ॥ ૨૧॥

મહેશ્વરકથાસુધાં પિવતિ શઙ્કરઃ શઙ્કરી-
કુમારગણનાયકપ્રમથદેવવૃન્દૈઃ સહ ।
ઇયં ખલુ સુધાઽપરા પરમમુક્તિદાનોત્સવા
તયાપિ ન સમાનમિત્યપિ મતિઃ પ્રવૃદ્ધા ભુવિ ॥ ૨૨॥

આનન્દેન નિધીયતે નિયમતઃ સા દુર્લભા દુર્લભં
તદ્ભિન્નં નનુ સર્વથાઽપિ ન કૃતિસ્તસ્યાં સુધાયાં નૃપ ।
સા તાવત્સ્વયમેવ શઙ્કરકૃપારૂપાપિ નિત્યાપિ સા
તદ્ભાનેન સમા સમાનમિતરત્ જન્યં ન તેનાસ્ત્યપિ ॥ ૨૩॥

સા તાવદ્ગિરિશપ્રસાદજનિતા જન્માદિદુઃખાટવી-
કલ્પાન્તાનલ એવ સા ન સુલભા વિશ્વેશ્વરાનુગ્રહે ।
સા તાવત્ સુલભા ભવત્યપિ સુધા તદ્ગોપનં સર્વથા
કર્તવ્યં શિવયોગિને પરમિદં દેયં સુધામુક્તયે ॥ ૨૪॥

શિવકથામૃતપાનપાનરતઃ સદા ધનપતેર્ધનમિચ્છતિ કઃ પુમાન્ ।
તદિદમસ્ય ધનં ન ધરાપતે ધનદકોશગૃહેઽપિ ન તદ્ધનમ્ ॥ ૨૫॥

ધનાનિ તાવદ્વિવિધાનિ લોકે વ્યથાકરાણ્યેવ તદાર્જનેઽપિ ।
વ્યયેઽપિ વિશ્વેશકથાનિધાનં ન દુર્લભં શામ્ભવપુઙ્ગવાનામ્ ॥ ૨૬॥

અપારપુણ્યયોગેન શ્રુતા શિવકથાસુધા ।
પાપાગ્નિતપ્તજિહ્વાગ્રતૃષામપહરિષ્યતિ ॥ ૨૭॥

સંસારાનલસાગરાનલમહાજ્વાલાકુલવ્યાકુલો
નિર્દગ્ધસ્તૃષિતઃ ક્ષુધાનલકુલવ્યાપ્તોદરઃ સાદરમ્ ।
યો ભક્તયા સકૃદેવ વા શિવકથાપીયૂષરાશિં મુદા
શ્રુત્વા તૃપ્તિમુપૈતિ તસ્ય ન તૃષા ક્ષુદ્વા ન તદ્વેદના ॥ ૨૮॥

આનન્દામૃતસિન્ધુરેવ ગિરિજાકાન્તપ્રભાવપ્રથા
પીયૂષાર્ણવવર્ણનં શિવકથાસારઃ સ સારઃ પરમ્ ।
સંસારાર્ણવમોચકોત્તમ ઇતિ જ્ઞાતસ્તતસ્તત્પરં
કિં વા સ્યાદિતિ ચિન્તનેઽપિ ન સમસ્તેનાસ્તિ લોકત્રયે ॥ ૨૯॥

અતઃ શિવકથાલાપૈરપલાપોઽપિ સંસૃતેઃ ।

અતઃ સત્સઙ્ગતેરેવ તત્કથાસ્વર્ધુની હૃદિ ॥ ૩૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે નારદપ્રોક્તં શિવપ્રસઙ્ગશ્રુતિમહિમાનુવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । ઉત્તરાર્ધમ્ । અધ્યાયઃ ૧૦। ૧૦-૩૦ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . uttarArdham . adhyAyaH 10. 10-30 ..

Notes:
Nārada નારદ narrates to Magadharāja મગધરાજ, the merits of listening to discourses about Śiva શિવ.

Proofread by Ruma Dewan

*Naradaproktam Shivaprasangashrutimahimavarnanam*
pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*